<u>शूलपाणि स्तोत्रम्</u>

*कार्तिकपूर्णिम - मन्मथनामसंवत्सरः*
*प्रेरणा - एकादशरुद्राभिषेकानंतरं पितृभ्यां कृपया*
*निमित्तमात्रः लेखकः - नागराजशर्मा*

सङ्गीतसाहित्यरसाधिदैवम्
कैलासवासं त्रिगुणं त्रिनेत्रम्।
सारङ्गपाणिं शुभदं सुगात्रम्
वन्दे सदाऽहं घनशूलपाणिम् ॥ १ [इन्द्रवज्रम्]

***उमां रमानाथसहोदरीं ताम्***
***कुमारविघ्नेश्वरमातृदेवीम्।***
***शिवाङ्गनां नित्यशुभप्रदात्रीम्***
***सदा भजेऽहं वरशूलहस्ताम् ॥ २ [उपेन्द्रवज्रम्]***

चन्द्रार्कवैश्वानरनेत्रभूतम्
नन्दीशवागीशगणादिसेव्यम् ।
सर्पेन्द्रहारं नटराजराजम्
वन्दे सदाऽहं घनशूलपाणिम्॥ ३ [इन्द्रवज्रम्]

***प्रमोदकारां मम सर्वकाले***
***अनादिमध्यांतविशेषरूपाम्।***
***रसस्वरूपामिह सर्वविद्याम्***
***सदा भजेऽहं वरशूलहस्ताम् ॥४ [उपेन्द्रवज्रम्]***

कन्दर्पदग्धं गिरिजाप्तधीरम्
इन्द्रादिपूज्यं वृषकेतनं तम् ।
श्रीशैलवासं भ्रमरासनाथम्
वन्दे सदाऽहं घनशूलपाणिम् ॥ ५ [इन्द्रवज्रम्]

***रवीन्द्रतेजोमयदिव्यगात्रीम्***
***शमादिसन्तोषसुखप्रदात्रीम्।***
***हराक्षदग्धेक्षुधरार्तरक्षाम्***
***सदा भजेऽहं वरशूलहस्ताम् ॥ ६ [उपेन्द्रवज्रम्]***

काशीपुरेशं वरदं शुभाङ्गम्
शम्भुं महेशं सुरदैत्यवंद्यम् ।
ईशानदेवं वरपञ्चवक्त्रम्
वन्दे सदाऽहं घनशूलपाणिम्॥ ७ [इन्द्रवज्रम्]

***कटाक्षदृष्ट्यां निखिलांडरक्षाम्***
***कुठारपाणेः हृदयाब्जमित्रंम्।***
***जरादिदुःखान् सुविनाशकर्त्रीं***
***सदा भजेऽहं वरशूलहस्ताम् ॥ ८ [उपेन्द्रवज्रम्]***

श‍ृङ्गेरिवासं शुभचन्द्रमौलिम्
भृङ्गीशचण्डीश सुसेव्यपादम् ।
सर्वेषु भूतेषु दयार्द्रमूर्तिम्
वन्दे सदाऽहं घनशूलपाणिम्॥ ९ [इन्द्रवज्रम्]

***विशालनेत्रां जगदीशजायाम्***
***साम्बं गिरीशं परमेश्वरं तम् ।***
***हरार्धनारीं च शिवं स्वयंभुम्***
***वन्दे सदाऽहं शिवशक्तिरूपम् ॥ १० [उपजाति]***

हीरानेतान् त्रिनेत्राभ्यां श्रद्दयायः पठेन्नरः ।
शिवलोकमवाप्नोति निश्चयेनस मेमतम् ॥ ११ [अनुष्टुब्]
अनुबन्धः १

गणपति: -

आनन्दरूपं सुरराजसेव्यम्
पाशादिहस्तं गजराजवक्त्रम् ।
विघ्नेशनामं करुणासमुद्रम्
वन्दे सदाऽहं शिवशक्तिपुत्रम् ॥ [इन्द्रवज्रम्]

अनुबन्धः - २

सुब्रह्मण्यः -

मयूरमारूढ जगद्विहारम्
सहस्रनागेन्द्रमपूर्वरूपम् ।
सनत्कुमारं धृतशक्तिकीलम्
सदा भजेऽहं शिवशक्तिपुत्रम् ॥ [उपेन्द्रवज्रम्]